# Navagraha Mangalastotram

# નવગ્રહમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Navagraha Mangala Stotram or Mangalashtakam 1

File name : navagrahamangalastotram.itx

Category : navagraha, nava, mangala, aShTaka

Location : doc_z_misc_navagraha

Description/comments : This has at least 9 verses but is mistakenly called aShTakam as well

Latest update : September 18, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 24, 2023

*sanskritdocuments.org*

# નવગ્રહમઙ્ગલસ્તોત્રમ્

ભાસ્વાન્ કાશ્યપગોત્રજોઽરુણરુચિઃ સિંહાધિપોઽર્કઃ સમિત્
    ષટ્ત્રિસ્થો દશમઃ શુભો ગુરુશશી ક્ષોણીજ મિત્રં સદા ।
શુક્રાર્કીતુ રિપૂ કલિઙ્ગવિષયેશોઽગ્નીશ્વરૌ દેવતે
    મધ્યે વર્તુલ પૂર્વ દિઙ્મુખ ઇનઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૧॥

ચન્દ્રઃ કર્કટ રાશિપઃ સિતરુચિઃ સ્વચ્છોત્રિ ગોત્રોદ્ભવો
    વહ્નયાશા ચતુરસ્ર વારુણમુખસ્ત્વાપઃશિવા દેવતે ।
ષટ્સપ્તાગ્નિ દશાદ્યગઃ શુભફલો નારિર્બુધાર્ક પ્રિયઃ
    સ્યાતાં યામુનદેશ પર્ણસમિધઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૨॥

ભૌમો યામ્ય મુખસ્ત્રિકોણનિલયોઽવન્તીશ્વરઃ ખાદિરઃ
    ત્વિધ્મોવૃશ્ચિક મેષપોઽસ્ય સુહૃદઃ સૂર્યેન્દુજીવાઃ સ્મૃતાઃ ।
જ્ઞોઽરિઃ ષટ્ ત્રિણગઃ શુભોથ વસુધા સ્કન્દૌ ક્રમાત્ દેવતે
    ભારદ્વાજ કુલોદ્ભવઃ ક્ષિતિસુતઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૩॥

સૌમ્યઃ પીત ઉદઙ્મુખઃ સમિદપામાર્ગોઽત્રિ ગોત્રોદ્ભવો
    બાણેશાનદિશૌ હિતો રવિ સિતૌ શત્રુઃ સ્મૃતઃ શીતગુઃ ।
કન્યાયુગ્મપતિર્દશાષ્ટમચતુઃ ષણ્નેત્રગઃ શોભનો
    દેવૌ કેશવપૂરુષૌ મગ ધપઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૪॥

જીવત્વાઙ્ગિરસઃ કુબેર વદનો દીર્ઘાબ્ધિ કોણે સ્થિતઃ
    પીતોશ્વત્થ સમિચ્ચ સિન્ધુવિષયઃ શક્રોવિધિર્દેવતે ।
સૂર્યેન્દુ ક્ષિતિજપ્રિયો બુધસિતૌશત્રૂ ધનુર્મીનપઃ
    સપ્તાદ્વ્ધિસુતે હિતઃ સુરગુરુઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૫॥

શુક્રોભાર્ગવ ગોત્રજઃ સિતનિભઃ પૂર્વામુખઃ પઞ્ચકો-
    ણસ્થોઽસ્થો તુલ ગોપતિઃ ખલુ મહારાષ્ટ્રેશ ઔદુમ્બરી ।
ઇન્દ્રાણી મઘવાસુરૌ બુધશનિમિત્રે રવીન્દૂ અરી
    ષટ્સપ્તાભ્ર કુવર્જિતે શુભફલઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૬॥

મન્દઃ પાશિમુખઃ શમીસમિદથો સૌરાષ્ટ્રપઃ કાશ્યપો
નક્રાદિ દ્વયપો હિતો બુધસિતૌ સૂર્યેન્દુભૌમાઃ પરાઃ ।
સ્થાનં પશ્ચિમદિક્ પ્રજાપતિયમૌ દેવૌ ધનુષ્યાસનઃ
ષટ્ત્રિસ્થઃ શુભકૃત્ શમી રવિસુતઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૭॥

રાહુર્બર્બર દેશપઃ તિમિરભો નૈરૃત્ય શૂર્પાસનો
યઃ પૈઠીનસિ ગોત્રજઃ ખલુ સમિદ્દૂર્વામુખં દક્ષિણે ।
કાલઃ પ્રત્યધિદેવતાસ્ત્વધિસુરઃ સોઽરિ ચન્દ્ર સ્થિતઃ
ષટ્ત્રિસ્થઃ શુભદોઽર્ધકાય ઉદિતઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૮॥

કેતુર્જૈમિનિ ગોત્રજઃ કુશસમિત્ વાયવ્ય કોણેસ્થિતઃ
ચિત્રાઙ્કુ ધ્વજલાઞ્છનો હિ ભગવન્ યો દક્ષિણાશા મુખઃ ।
બ્રહ્માદિ ત્રિદશાલયઃ સુરપતિઃ સચ્ચિત્રગુપ્તઃ ખગઃ
ષટ્ત્રિસ્થશ્ચ શુભઃ પલાશ સદૃશઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૯॥

ઇત્યેવં ગ્રહમઙ્ગલાષ્ટકમિદં લોકોપકારપ્રદમ્
પાપૌઘ પ્રશમં મહત્ સુખકરં સૌભાગ્ય સંવર્ધનમ્ ।
યઃ પ્રાતઃ શ ૃણુયાત્ પઠેદનુદિનં શ્રીકાલિદાસોચિતમ્
સ્તોત્રં મઙ્ગલદાયકં પરિપઠન્ પ્રાપ્નોત્યભીષ્ટં મહત્ ॥ ૧૦॥

ઇતિ શ્રીકાલિદાસોચિતં નવગ્રહમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

નવગ્રહમઙ્ગલાષ્ટકમ્

Version 2

ભાસ્વાન્ કાશ્યપગોત્રજોઽરુણરુચિર્યસ્સિંહપોઽર્કસ્સમિ-
ત્ષટ્ત્રિસ્થોઽદશશોભનો ગુરુશશી ભૌમાસ્સુમિત્રાસ્સદા ।
શુક્રો મન્દરિપુઃ કલિઙ્ગજનપશ્ચાગ્નીશ્વરૌ દેવતે
મધ્યેવર્તુલપૂર્વદિગ્દિનકરઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૧॥

ચન્દ્રઃ કર્કટકપ્રભુસ્સિતનિભશ્ચાત્રેયગોત્રોદ્ભવ-
શ્ચાત્રેયશ્ચતુરશ્રવારુણમુખશ્ચાપે ઉમાધીશ્વરઃ ।
ષટ્સપ્તાગ્નિ દશૈકશોભનફલો નોરિર્બુધાર્કૌપ્રિયૌ
સ્વામી યામુનજશ્ચ પર્ણસમિધઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૨॥

ભૌમો દક્ષિણદિક્ત્રિકોણયમદિગ્વિન્ધ્યેશ્વરઃ ખાદિરઃ

સ્વામી વૃશ્ચિકમેષયોસ્સુ ગુરુશ્ચાર્કશ્શશી સૌહૃદઃ ।
જ્ઞોઽરિષ્ષટ્ત્રિફલપ્રદશ્ચ વસુધાસ્કન્દૌ ક્રમાદ્દેવતે
ભારદ્વાજકુલોદ્વહોઽરુણરુચિઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૩॥

સૌમ્યઃ પીત ઉદઙ્મુખસ્સમિદપામાર્ગો ત્રિગોત્રોદ્ભવો
બાણેશાનદિશસ્સુહૃદ્રવિસુતશ્શેષાસ્સમાશ્શીતગોઃ ।
કન્યાયુગ્મપતિર્દશાષ્ટચતુરષ્ષણ્ણેત્રગશ્શોભનો
વિષ્ણુર્દેવ્યધિદેવતે મગધપઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૪॥

જીવશ્ચાઙ્ગિરગોત્રજોત્તરમુખો દીર્ઘોત્તરાશાસ્થિતઃ
પીતોઽશ્વત્થસમિચ્ચસિન્ધુજનિતશ્ચાપોઽથ મીનાધિપઃ ।
સૂર્યેન્દુક્ષિતિજાઃ પ્રિયા બુધસિતૌ શત્રૂ સમાશ્ચાપરે
સપ્ત દ્વે નવ પઞ્ચમે શુભકરઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૫॥

શુક્રોભાર્ગવગોત્રજસ્સિતરુચિઃ પૂર્વામુખઃ પૂર્વદિક્
પાઞ્ચાલસ્થ વૃષસ્તુલાધિપમહારાષ્ટ્રાધિપૌદુમ્બરઃ ।
ઇન્દ્રાણીમઘવાબુધશ્ચ રવિજો મિત્રોર્ક ચન્દ્રાવરી
ષષ્ઠત્રિર્દશવર્જિતેભૃગુસુતઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૬॥

મન્દઃ કૃષ્ણનિભઃ સપશ્ચિમમુખઃ સૌરાષ્ટ્રપઃ કાશ્યપ-
સ્સ્વામી નક્રસુકુમ્ભયોર્બુધસિતૌ મિત્રૌ કુજેન્દૂદ્વિષૌ ।
સ્થાનમ્પશ્ચિમદિક્પ્રજાપતિયમૌ દેવૌ ધનુષ્યાસનૌ-
ષ્ષટ્ત્રિસ્થશ્શુભકૃચ્છમીરવિસુતઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૭॥

રાહુસ્સિંહલદેશપો નિરૃતિઃ કૃષ્ણાઙ્ગશૂર્પાસનઃ
યઃપૈઠીનસગોત્રસમ્ભવસમિદ્દૂર્વામુખો દક્ષિણઃ ।
યસ્સર્પઃ પશુદૈવતોઽખિલગતસ્સ્વામ્યાદ્વિશેષપ્રદ
ષટ્ત્રિસ્થશ્શુભકૃચ્ચ સિંહકસુતઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૮॥

કેતુર્જૈમિનિગોત્રજઃ કુશસમિદ્વાયવ્યકોણેસ્થિતઃ
ચિત્રાઙ્કધ્વજલાઞ્છનોહિભગવાન્યો દક્ષિણાશામુખઃ ।
બ્રહ્માચૈવતુ ચિત્રગુપ્તપતિમાન્પ્રીત્યાધિદેવસ્સદા-
ષટ્ત્રિસ્થશુભઃ કૃચ્ચ બર્બરપતિઃ કુર્યાત્સદા મઙ્ગલમ્ ॥ ૯॥

ઇતિ નવગ્રહમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

નવગ્રહમઙ્ગલાષ્ટકમ્

The stotra has at least nine verses but is also
called as aShTakam, perhaps mistakenly.

*Navagraha Mangalastotram*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*